श्रीमते रामानुजाय नमः

# अनन्दाळ्.वान् अरुळिच् चेय्द
# ॥ श्रीगोदा चतुष्लोकी ॥

चक्रे गोदाचतुश्लोकीं योवेदार्थ प्रकर्पितम् ।
श्रीवेङ्कटेशसद्भक्तं तं अनन्तगुरुं भजे ॥

नित्या भूषा निगम शिरसां निस्समोत्तुङ्ग वार्ता
कान्तो यस्याः कचविलुलितैः कामुको माल्यरत्नैः ।
सूक्त्या यस्याः श्रुति सुभगया सुप्रभाता धरित्री
सैषा देवी सकल जननी सिञ्चतां मामपाङ्गैः ॥ 1

माता चेत्तुलसी पिता यदि तव विष्णुचित्तो महान्
भ्राता चेत् यतिशेखरः प्रियतमः श्रीरङ्गधामा यदि ।
ज्ञातारः तनयाः त्वदुक्ति सरस स्तन्येन संवर्धिताः
गोदा देवी कथं त्वं अन्यसुलभा साधारणा श्रीरसि ॥ 2

कल्पादौ हरिणा स्वयं जनहितं दृष्ट्वैव सर्वात्मनां
प्रोक्तं स्वस्य च कीर्तनं प्रपदनं स्वस्मै प्रसूनार्पणम् ।
सर्वेषां प्रकटम् विधातुमनिशं श्रीधन्विनव्ये पुरे
जातां वैदिक विष्णुचित्त तनयां गोदां उदारांस्तुमः ॥ 3

आकूतस्य परिष्क्रियां अनुपमां आसेचनं चक्षुषोः
आनन्दस्य परंपरां अनुगुणां आरामशैलेशितुः ।
तद्दोर्मध्य किरीटकोटि घटित स्वोच्छिष्ट कस्तूरिका
माल्यामोद समेधितात्म विभवां गोदां उदारांस्तुमः ॥ 4

**॥ इति श्रीगोदा चतुष्लोकी ॥**